श्री बिदरहळ्ळि श्रीनिवासतीर्थकृता श्रीव्यासनामावली

ईशिता श्रुतिभर्ता च भुवनप्रभुरेव च ।
जगद्गुरुः सद्गुरुश्च मुनिवंशस्य शेखरः ॥१॥

भगवत्तमो वेदराट् च तथा सत्यवतीसुतः ।
श्रुतीश्वरो नीलभाश्च पाराशर्यो महाप्रभुः ॥२॥

वेदव्यासः सत्पतिश्च द्विजेंद्रान्वयजस्तथा ।
जगत्पिताऽजितश्चैव मुनींद्रो वेदनायकः ॥३॥

देवतापूज्यचरणश्चाम्नायानां सुपालकः ।
भारतानां वरगुरुः ब्रह्मसूत्रप्रणायकः ॥४॥

द्वैपायनो मध्वनाथो ज्ञानसूर्यः सदिष्टदः ।
विद्यापतिः श्रुतिपतिः विद्याराजो गिरां प्रभुः ॥५॥

विद्याधिराजो वेदेशस्तथा वेदपतिः स्वभूः ।
विद्याधिनाथो वेदराट् तथाऽम्नायविकासकः ॥६॥

विद्याधीशः श्रुतीशश्च श्रुतिपङ्कजभास्करः ।
कृष्णद्वैपायनो व्यासो भक्तचिंतामणिस्तथा ॥७॥

महाभारतनिर्माता कवींद्रो बादरायणः ।
स्मृतिमात्रार्तिहा चैव भक्तवित्रासहा तथा ॥८॥

विश्ववेत्ता विश्वपतिर्भक्ताज्ञानविनाशकः ।
विघ्नौघांततरणिर्विघ्नाटव्याश्च हव्यवाट् ॥९॥

विघ्नव्यालविपश्चैव विघ्नौघघनमारुतः ।
विघ्नेभपञ्चाननश्च विघ्नपर्वतसत्पविः ॥१०॥

विघ्नाब्धिकुम्भजश्चैव विघ्नतूलसदागतिः ।
बादरिर्जैमिनिश्चैव सुमंतुर्वैशंपायनः ॥११॥

आश्मरथ्यश्च पैलश्च काशकृत्स्नश्च लोमशः ।
कार्ष्णाजनिश्चौडुलोमिरात्रेयो रोमहर्षणः ॥१२॥

इत्येते मुनयः शिष्या यस्यासौ मुनिशेखरः ।
ब्रह्माद्यैः प्रार्थितो विष्णुः सत्यवत्यां पराशरात् ॥१३॥

प्रादुर्भूतो व्यासरूपी वेदोद्धारकरस्तथा विज्ञानरोचिषा
पूर्णो ब्रह्ंआण्डांतर्बहिस्तथा ॥१४॥

योगिमानसकञ्जस्थः हरितोपलसन्निभः ।
भक्ताज्ञानसुसंहारी तर्कमुद्रायुतः करे ॥१५॥

दक्षिणे भवभीतानां भवनाशाय मुद्रया ।
अभयाख्यया युतः सव्ये करे सन्मङ्गलप्रदः ॥१६॥

प्राज्ञमौलिश्च पुरुधीः सुखकांतिर्विबोधभाः ।
शतेंद्वधिकसत्कांतिरयोग्यजनमोहकः ॥१७॥

शुक्लरक्तविदूरश्च ब्रह्माद्यैर्वर्णमानिभिः ।
संस्तुतानंदसुगुणो योगींद्रः पद्मजार्चितः ॥१८॥

आचार्यवर्यो विप्रात्मा पापनाशननामवान् ।
वेदांतकर्ता भक्तानां कवितादिगुणप्रदः ॥१९॥

वादे विजयदश्चैव रणे च विजयप्रदः ।
कीटराज्यप्रदः कीटमोक्षदाता च सत्प्रभुः ॥२०॥

आम्नायोद्धारकश्चैव तथा सत्पुरुवंशकृत् ।
मुनेः शुकस्य जनको जनकस्योपदेशकः ॥२१॥

मातुः स्मृत्यैवागमनवरदातेश्वरेश्वरः ।
यमुनाद्वीपसुजनिर्यमुनाद्वीपभासकः ॥२२॥

मात्राज्ञापालनार्थाय भगवान् पुरुषोत्तमः ।
धृतराष्ट्रपांडुविदुरजनको ज्ञानदस्तथा ॥२३॥

उग्ररूपः शांतरूपोऽचिंत्यशक्तिः परात्परः ।
पांडवानां दुःखहंता तथाऽपरिमितांतरः ॥२४॥

हिडिंबासङ्ग्रहार्थाय भीमाज्ञासंप्रदायकः ।
शक्तः कानीन इंद्रश्च शास्त्रकृद्धरिरेव च ॥२५॥

द्विषामज्ञानपापानामतिसङ्क्रामस्तथा ।
कर्मबंधसुभेत्ता च मुक्तानां स्वात्मवाहकः ॥२६॥

आसमंताद्गत इति व्यास इत्यभिविश्रुतः ।
हृदि स्थित्वा धीप्रदः स ह्यक्षरोच्चारकारकः ॥२७॥

मात्रासंधिस्वरात्मा च संहितानामकस्तथा ।
ह्रस्वमांडूकेयनामऋष्युपासितपादवान् ॥२८॥

स व्यासो वीति तमं स वै वि स ऐवाधस्तात् ।
येन संधिं विवर्तयतीट् शक्र प्रोहते ॥२९॥

वयः सुपर्णो यश्छंदसामित्यादिश्रुतीरितः ।
कलिमागतमाज्ञाय भगवान् पुरुषोत्तमः ॥३०॥

जनदृग्विषयत्वं तु त्यक्त्वाऽगाद्गंधमादनम् ।
बदर्याश्रममध्यास्ते तत्रत्यं दिव्यमुत्तमम् ॥३१॥

यदाज्ञां शिरसा धृत्वा मरुन्मध्वात्मनाऽभवत् ।
यदर्थं तद्विधायाशु सोऽपि गत्वा तमाश्रमम् ॥३२॥

तमेव सेवमानः सन्नास्ते ह्यानंदनिर्भरः ।
व्यासनामावलीमेतां यः पठेच्छृणुयान्नरः ॥३३॥
तस्याशुभानि नश्येयुः वृद्धा स्याच्छुभसंततिः ।
ऐहिकामुष्मिकान् कामान् स लभेत न संशयः ।
किमत्र बहुनोक्तेन व्यासः संप्रीतिमाप्नुयात् ॥३४॥

॥ इति श्रीबिदरहळ्ळि श्रीनिवासतीर्थकृता श्रीव्यासनामावली ॥